CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
52-P-13
Coll. No. 794

Title Śankaravijayadindima

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 794 Subject: Kāvya.

Title: Śankaravijayaḍiṇḍima.

Author: Dhanapati Scribe: –

Date of the work: – Date of the Ms.: –

Place of the work: – Place of the Ms.:

Size: 12.3" by 6.9" Extent: 12 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks:

श्री०॥ अथहस्तामलकादिप्रसंगंसपरिकरंवर्णयितुमारभते अथानंतरमेकस्मिन्कालेयतिचक्रवर्त्तीश्रीशंकरः शिष्यैःसह सर्वाणितीर्थानिचरन्
घोरात्कलेर्गोपितोरक्षितोधर्मोयेनतं अभ्यर्णःअविदूरःचलःसमुद्रस्यौघोरयोयस्यतंगोकर्णमागात् अभेश्चाविदूरइत्यनेनार्दोनिपातयाइणिनषेधः
॥ उ० ॥ १॥ गत्वाचप्रणमन्महेशंतुष्टाव कथंभूतमितितत्राह विरिंचिनाब्रह्मणा विरिंच्योथविरिंचिश्चब्रह्मण्यपिविरंचिनइतिविश्वप्रकाशः क
मलनाभेनविष्णुनाचवंद्यं यतःप्रपंचलक्षणस्यनाट्यस्याद्भुतसूत्रधारं कूटस्थत्वेसतितत्कर्तृत्वेनाश्चर्यरूपंनाटकाचार्यंयतोमायासचिवमित्याह
वामार्द्धेवधूटिर्वधूर्यस्यतं तथाप्यस्तोदुष्टानांकामक्रोधादीनांलेपोयस्मात्तं ॥ २ ॥ कामारेर्वपुःस्मरामि क्वचनदक्षिणभागेबलाहकेनमेघेनाद्वैत

श्री० ॥ अथद्वादशःसर्गः॥ अथैकदासौयतिसार्वभौमस्तीर्थानिसर्वाणिचरन्सतीर्थ्यैः॥ घोरात्कलेर्गोपितधर्ममा
गाद्गोकर्णमभ्यर्णचलार्णवौघं॥ १ ॥ विरिंचिनांभोरुहनाभवंद्यंप्रपंचनाट्याद्भुतसूत्रधारं ॥ तुष्टाववामार्द्धवधू
टिमस्तदुष्टावलेपंप्रणमन्महेशं॥ २ ॥ वपुःस्मरामिक्वचनस्मरारेर्बलाहकाद्वैतवदावदश्रि ॥ सौदामिनीसाधित
संप्रदायसमर्थनादेशिकमन्यतश्च॥ ३ ॥ दामांगसीमांकुरदंशुतृण्याचंचन्मृगांचत्तरदक्षपाणि ॥ सव्यान्यशो
भाकलमाग्रभक्षसाकांक्षकीरान्यकरंमहोस्मि॥ ४ ॥

स्याभेदस्यवदावदावादिनीश्रीर्यस्मिन् अन्यतोवामभागतश्चविद्युतासाधितस्यमेघाविनाभावादिरूपस्यसंप्रदायस्यसमर्थनायांदेशिकंग
किंच वामांगलक्षणेसीम्निक्षेत्रे सीमाघटिस्थितिक्षेत्रेष्वंडकोशेपिचस्त्रियामितिमेदिनी अंकुरंत्यांरोहंत्यांकिरणलक्षणायांतृण्यायां
चन्मृगेणस्फुरन्नुत्तरोदक्षिणहस्तोयस्यतत्तथा सव्यान्यस्यदक्षिणभागस्यशोभैवकलमःसस्यं कलमःपुंसिलेखन्यांशालौपाटच्चरे
तस्याग्रस्यभक्षणेसाकांक्षःकीरःशुकोन्यकरेवामहस्तेयस्यतन्महोहमस्मि तत्रशिवकरेमृगःपार्वतीहस्तेशुकइतिबोध्यं ॥ ४ ॥

किंच धराधरस्य हिमाचलस्य कन्यायागलेन संलग्नोऽपि मांगल्यतंतुः सौभाग्यसूत्रं यस्य कंठदेशे हालाहलं कुंठशक्तिमकृत सोयं
वादहमेवास्मि ॥ ५ ॥ गुणातीतैर्विभाव्यं विभावनीयं गोकर्णनाथमित्थं वचसार्चयित्वा तिस्रः रात्रीस्त्रिजगत्पवित्रे क्षेत्रे सैष गुदाक

॥ ६ ॥ ततश्च वैकुंठकैलासयोर्विवर्तभूतं स्वातिरिक्ताकारेण वर्त्तनं विवर्त्तस्तद्रूपं तयो रूपांतरं नताघं हरत् हरिशंकराख्यं दिव्यं स्थलं त॥ थ

महीध्रकन्यागलसंगतोऽपि मांगल्यतंतुः किल हालहालं॥ यत्कंठदेशे कृतकुंठशक्तिमैक्यानुभावाद्यमस्मि भू
मा॥ ५॥ गुणत्रयातीतविभाव्यमित्थं गोकर्णनाथं वचसार्चयित्वा ॥ तिस्रः स रात्रीस्त्रिजगत्पवित्रे क्षेत्रे मुदं
षक्षिपति स्म कालं॥ ६॥ वैकुंठकैलासविवर्तभूतं हरन्नताघं हरिशंकराख्यं ॥ दिव्यस्थलं दैशिकसार्वभौमस्ती
र्थप्रवासी न चिराद्यासीत्॥ ७॥ भ्रमापनोदाय भिदावदानामद्वैतमुद्रामिह दर्शयंतौ॥ आराध्यदेवौ हरिशंक
रौ सद्यर्थाभिरित्यर्चयति स्म वाग्भिः॥ ८॥

शिकसार्वभौमः शीघ्रमेवागात् ॥ ७॥ भेदवादिनां भ्रमापनोदायास्मिन्लोके अद्वैतमुद्रां दर्शयंतौ हरिशंकरौ देवावाराध्यः स श्रीशंकर इति वक्ष्यमाणप्र
कारेण द्व्यर्थाभिर्वाग्भिरर्चयति स्म ॥ ८ ॥

ताएवोदाहरति वंधंसप्तर्ष्यादिभिर्वेदनीयं महतःसोमस्यप्रलयाब्धिनीरस्यकलाभिरंशैःकलायांमूलेवाविलासःक्रीडायस्य सोमःकुबेरेपितृदे
वतायांवसुप्रभेदेचसुधाकरेच दिव्यौषधीश्यामलतासमीरकर्पूरनीरेषुचवानरेचेतिविश्वप्रकाशः कलास्यान्मूलरैद्धौशिल्पादावंशमात्रकइ
तिमेदिनी सोमकस्यवेदापहारकस्यासुरस्यलावीनाशकोलासःक्रीडायस्येतिवा तथाभूतमनादिसर्वकारणत्वादकारणंमैनंमात्स्यंदिव्यमप्राकृ
तंकिंचनाचिंत्यंतेजोंगीकुर्वन्गांनौकारूपांभूमिमादरेणाकलयन्विकर्षन्विभुरनंतशक्तिव्यापकोविभुर्मेकुशलानिकुर्यात् तथाचोक्तं रूपंस
जगृहेमात्स्यंचाक्षुषोदधिसंप्लवे नाव्यारोप्यमहीमय्यामपाद्वैवस्वतंमनुमिति अहंत्वामृषिभिःसाकंमहानावमुदन्वति विकर्षन्विचरिष्यामियाव

वंधंमहासोमकलाविलासंगामादरेणाकलयन्ननादिं॥ मैनं
महःकिंचनदिव्यमंगीकुर्वन्विभुर्मेकुशलानिकुर्यात् ॥ १ ॥

द्ब्राह्मीनिशाप्रभोइतिच अनादिभूतांगांवेदवाचमादरादाकलयन्प्रत्याहरन्निितिवा तथाचोक्तं अतीतेप्रलयापायेउत्थितायसवेधसे हत
यीवंवेदान्प्रत्याहरद्धरिरिति पक्षेसोमस्यचंद्रस्यकलायाविलासोयस्मिंस्तयासहविलासोयस्येतिवा सोमानांहिमालयोद्भवानां
कलाभिरितिवा सोमस्यकर्पूरस्येतिवा अनादिभूतांगांश्रुतिमादरेणाकलयन्विचारयन् गांवृषभमादरेणप्रेरयन्नितिवा मनायाहि
याजातंकिंचनपार्वतीलक्षणंमहोंगीकुर्वन्नितिव्याख्येयंइति ॥ इंद्र० ॥ १ ॥

शं॰वि॰ एवंमत्स्यावतारमभिधायाथकमठावतारंनिरूपयन्नाह योमंदराख्यमचलंदधत् आदितेयान्देवान्सुधाभुजआतनुतेस्मा विष
भवानद्रेर्मंदराचलस्यलीलायांभ्रमणात्मविलासार्थमुचितायोग्याचारुमूर्त्तिर्यस्यतस्यसंबोधनंहेअद्रिलीलोचितचारुमूर्त्तेकूर्म
रूपांविधत्तां पक्षेयोमंदरागंमंदराख्यपादपंदधद्विषादीस्वयंविषभक्षकोदेवान्सुधाभुजोव्यातनुतेस्माद्रौकैलासेयालीलाविलास
॥ २ ॥ चारुमूर्त्तिर्यस्येतिव्याख्येयं अगःस्यान्नगवत्पृथ्वीधरपादपयोःपुमान् मंदरस्तुपुमान्मंथशैलेमंदारपादपइतिमेदिनी ॥ उ॰ ॥ १०
राहावतारंवर्णयन्नाह यउच्चैर्महेर्भूमेर्मानंचित्तोन्नतिमुल्लासयन्स्फुरन्योवराह्याःसूकर्याईशोवराहीशस्तत्कलेवरस्तद्विग्रहोऽभूत् म

योमंदरागंदधदादितेयान्सुधाभुजःस्मातनुतेऽविषादी ॥ स्वामद्रिलीलोचितचारुमूर्तेकूपामपारांसभवा
न्विधत्तां॥ १०॥ उल्लासयन्योमहिमानमुच्चैःस्फुरद्वराहीशकलेवरोऽभूत् ॥ तस्मैविदध्मःकरयोरजस्रंनायंत
नांभोरुहसामरस्यं॥ ११॥ समावहन्केसरितांवरांयःसुरद्विषत्कुंजरमाजघान ॥ प्रह्लादमुल्लासितमादधा
नंपंचाननंतंप्रणुमःपुराणं॥ १२॥

त्तोन्नतौग्रहइतिविश्वप्रकाशः पक्षेवराहीशकलेवरःशेषविग्रहस्तस्मैवराहीशोवासुकिःकलेवरेयस्येतिवा हस्तयोर्मुकुलितपद्मसाम्यमजस्रंवि
दध्मः ॥ ११ ॥ अथनृसिंहावतारंनिरूपयन्आह तंपंचास्यंसिंहंपरमात्मानं पुराणंसदैकरसं प्रणुमस्तंकमितितत्राह योवरांकेसरितांनृहरितां ॥ २ ॥
समावहन्सुरद्विषतांकुंजरंहिरण्यकशिपुमाजघान तंपुनःप्रह्लादमुल्लासितमादधानं पक्षेपंचमुखंसदाशिवं यःकेशिरसिसरितांनदीनांमध्ये
वरांश्रेष्ठांगंगांसमावहन् सुरशत्रुंगजासुरमाजघान प्रकर्षेणाल्हादमुल्लासितमादधानमित्यर्थः ॥ १२ ॥

अथवामनावतारंवर्णयन्नाह योबलेःसकाशात्त्रैलोक्याहरणाभिलाषः सुंदरंमृगचर्मवसानोवामनः उदीतउदितोभूत् कां
व्यतानीत्सोयमाश्रमिणामाद्योब्रह्मचारीनोऽस्मानवतात् पक्षेयोमनोहारिमनोज्ञमजिनंवसानोदक्षाध्वराद्बलेराहरणाभिल
त्या ॥ वि० ॥ १२ ॥ अथपरशुरामावतारंनिरूपयन्नाह येनाधिकंयथास्यात्तथोद्यत्तरेणवारिणाबालकेनपरशुरामेणार्जुन..
ध्रसंगररंगभूमौयुद्धरंगभूमौजितः वारिर्वाग्गजबंधन्योःस्त्रीक्लीबेंबुनिबालके अर्जुनःककुभेपार्थेकार्त्तवीर्यमयूरयोः मातुरेकसुतेऽपिस्य..
नरन्यवदितिमेदिनी नक्षत्रनाथवच्चंद्रवत्स्फुरितेननतेनकेनापिनाथेनवयंसनाथाः पक्षेअधिकंशिरसिवारिजलंयस्यार्जुनःपार्थ. नक्षत्रनाथे

उदीनबल्याहरणाभिलाषोयोवामनोहार्यजिनंवसानः ॥ तपांसिकांतारहितोव्यतानीदाद्योवतादाश्रमिणा
मयंनः ॥ १३ ॥ येनाधिकोद्यत्तरवारिणाशुजितोर्जुनःसंगररंगभूमौ ॥ नक्षत्रनाथस्फुरितेनतेननाथेनकेना
पिवयंसनाथाः ॥ १४ ॥ विलासिनालीकभवेनधाम्नाकामंद्विषंतंसदृशास्यमस्यन् ॥ देवोधरापत्यकुचोष्म
साक्षीदियादमंदात्मसुखानुभूतिं ॥ १५ ॥

रितोन्यत्रेत्यर्थः॥ १४॥ श्रीरामचंद्रावतारंनिरूपयन्नाह अलीकोऽसत्योभवःसंसारोयस्मिंस्तथाभूतेनविलासिनास्वधाम्नास्वज्योतिषायथेष्टंद्विषं
तं रावणमस्यन्नुत्क्षिपन्नाशयन् धराभूमिस्तस्याअपत्यंसीतातस्याःकुचयोरुष्णतायाःसाक्षीसाक्षाद्द्रष्टासदेवोऽमंदसुखानुभूतिममितब्रह्मानंदा
नुभवंदेयात् पक्षेदशेंद्रियाणिमुखानियस्य तथाभूतंद्विषंतंकाममस्यन्धरस्यपर्वतस्यापत्यंपार्वतीतस्याःकुचोष्मसाक्षीतिव्याख्येयं धरोगिरौ
कार्पासतूलेकूर्मराजेवस्वंनरेऽपिचेतिमेदिनी ॥ १५ ॥

अथबलरामावतारंवर्णयन्नाहोच्चतालकेतुः स्थिराधर्ममयीधर्मायवामूर्त्तिर्यस्यहालाहलयोःसुराहलयोःस्वीकरणे हालासुरायामितिमेदिनी
तथापिश्रेष्ठकंठोरोहिणीशेनवसुदेवेनानिशंचुंब्यमानमुत्तमांगंशिरोयस्यसकोपिभूमाअवाङ्मनसगोचरोयत्रनान्यत्पश्यतिनान्यच्छृणोतिनान्य
द्विजानातिसभूमायोवैभूमातत्सुखमितिश्रुत्युपलक्षितःपरमात्माऽवतु पक्षेउत्कृष्टतालेगीतकालेकेतुःरुक्यस्य मोक्षधर्ममयीमोक्षधर्मायवामू
र्त्तिर्यस्यमोक्षधर्मस्यमूर्त्तिःकार्यंतत्प्राप्यइतिवा हालाहलस्यविषस्यस्वीकरणेनोग्रकंठोहालाहलस्वीकरणेपिश्रेष्ठकंठइतिवा रोहिणीशश्चंद्रः ता
लःकरतलेंगुष्ठमध्यमायांचसंमिते गीतकालक्रियामानेकरस्फालेद्रुमांतरे केतुर्नारुक्पताकारिग्रहोत्पातेषुलक्ष्मणि स्थिराभूशालपर्ण्योर्नास

उत्तालकेतुःस्थिरधर्ममूर्तिर्हालाहलस्वीकरणोग्रकंठः ॥ सरोहिणीशानिशचुंब्यमाननिजोत्तमांगोवतुकोपिभूमा॥ १६॥ विनायकेनाकलिताहितापंनिषेदुषोत्संगभुविप्रहृष्यन् ॥ यःपूतनामोहिकचित्तवृत्तिरव्यादसौकोऽपिकलापभूपः॥ १७॥

नेमोक्षेबलेत्रिषु मूर्त्तिःकार्यकाठिन्ययोःस्त्रियामितिमेदिनी ॥ १६ ॥ अथश्रीकृष्णावतारंवर्णयन्नाह कलितंसमासादितमहितापंयथास
थोत्संगभुविसमीपस्थानेनिषेदुषानिषण्णेनोपविष्टेनविनायकेनगरुडेनोपलक्षितोयःपूतनायामोहिकाचित्तवृत्तिर्यस्य कलापःबर्हंभू
रोयस्यासौकोपिवर्णयितुमशक्यःप्रहृष्यन्सन्नव्यात् संसृतिलक्षणादनर्थादवतु पक्षेआकलिताःशुंडयासमासादिताःशिवशि
पोयस्यांक्रियायां तथांकस्थानेनिषेदुषाविनायकेनविघ्नराजेनोपलक्षितोयः पूतंपवित्रंनामयस्योहिकेषुस्वर्चितकेपुचि
त्तवृत्तिर्यस्मिन्नितिवा कलापस्तूणंभूपायस्यासावित्यर्थः ॥ १७ ॥

अथबुद्धावतारंनिरूपयन्नाह पाठीनकेतोःमीनकेतोःकामस्यजयिने मारजिल्लोकजिज्जिनइत्यमरः प्रतीतःप्रख्यातःसर्वज्ञभ...
सीम्ने प्रायःक्रतुषुयज्ञेषुद्वेषोयेषांतेषुकृतआदरोयेन तैःकृतआदरोयस्मिन्नितिवा तस्मैबोधैकधाम्नेभूम्नेस्पृहयामि एवंभूतंप्र...
क्रतौसंकल्पेद्वेषोयेषांतिषु कृतआदरोयेन यद्वा दक्षक्रतौद्वेषवत्सुवीरभद्रादिषुकृतादरायेतिव्याख्येयं ॥ इंद्र० ॥ १८ ॥ कल्प...
न्नाह जनानांचेतोविषयंव्यतीत्य विद्योतमानायाचिंत्यविग्रहंस्वीकृत्यप्रकाशमानाय कल्पान्ततमोनिहंत्रे सतामावासायकृतःआ...
न सतःसत्ययुगस्येतिवा सतामासर्वोयस्मिंस्तथाभूतेकृतयुगेभिप्रायोयस्येतिवा परिच्छिन्नतांशातयतिभूम्नेममभूयांसिनमांसिनमस्कार...

पाठीनकेतोर्जयिनेप्रतीतसर्वज्ञभावायदयैकसीम्ने ॥ प्रायःक्रतुद्वेषकृतादरायबोधैकधाम्नेस्पृहयामिभूम्ने ॥
॥ १८ ॥ व्यतीत्यचेतोविषयंजनानांविद्योतमानायतमोनिहंत्रे ॥ भूम्नेसदावासकृताशयायभूयांसिमेसंतु
तमांनमांसि ॥ १९ ॥ वृषाकपायीवरयोःसपर्यांवाचातिमोचारसयेतितन्वन् ॥ मुनिप्रवीरोमुदितात्मका
मोमूकांविकायाःसदनंप्रतस्थे ॥ २० ॥

तिशयेनसंतु पक्षेचेतोगोचरतयाप्रकाशमानायस्वयंप्रकाशायातएवचक्षुःसहकृतभानुवद्वृत्त्यारूढःसन्तमोनिहंतेत्याहाज्ञानलक्षणतमोनिहं त्रेपुनःपरिपूर्णानंदरूपाय परब्रह्मणे सदैववासायकृतःसर्वस्याशयोंतःकरणंयेन सतामावासेकाश्यादौकृतोऽभिप्रायोयेनेतिवा ॥ उ० ॥ १९ ॥ उपसंहरति इत्येवमतिक्रांतकदलीफलरसयावाचा लक्ष्मीपार्वत्यधीशयोःपूजांवितन्वन् मुदितश्चासावात्मकामश्च मुदिताआत्मकामायेनेति वा समुनिप्रवीरोमूकांबिकायाःसदनंप्रतस्थे ॥ विप० ॥ २० ॥

तत्रजातंवृत्तांतमावेदयति विगतप्राणमात्मजमंकेनिधाय हंतेत्यतिकष्टे मुहुः प्ररुद्य महाव्याकुलौयतःसएवैकः पुत्रोययोस्तौदंपतीदृक्षासश्रीशंक रोदयाधीनतयाशुशोच ॥ उ० ॥ २१ ॥ एवमस्मिन्श्रीशंकरेऽपारंशोकंगच्छतिसति उच्चैरशरीरवाचाअभूयताशरीरणीवागभूत् तामुदाहरति संरक्षितुमक्षमस्यनरस्यदयापरंकेवलंदुःखायैवजायेतेत्येवमभूयतेत्यर्थः ॥ २२ ॥ तामशरीरिर्णीवाचमाकर्ण्यासौविज्ञःश्रीशंकरइतिव्याहरति स्म तदाहेदंसत्यंजगत्रयीरक्षणकुशलस्यैवंवक्तुस्तवैवैकस्यतुसादयाशोभते तथादययासमर्थेनत्वयैतयोःशोकोपाकरणीयइतिभावः ॥ २३ ॥

अंकेनिधायव्यसुमात्मजातंमहाकुलौहंतमुहुःप्ररुद्य ॥ तदेकपुत्रौद्विजदंपतीसदृक्षादयाधीनतयाशुशोच ॥
॥ २१ ॥ अपारमंचत्यथशोकमस्मिन्नभूयतोच्चैरशरीरवाचा ॥ जायेतसंरक्षितुमक्षमस्यजनस्यदुःखायपरंदये
ति ॥ २२ ॥ आकर्ण्यवाणीमशरीरिर्णींतामसाविति व्याहरतिस्मविज्ञः ॥ जगत्रयीरक्षणदक्षिणस्यसत्यंतवैक
स्यतुशोभतेसा ॥ २३ ॥ इतीरयत्येवयतौद्विजातेस्तुतःसुखंसुप्तइवोदतिष्ठत् ॥ समीपगैःसर्वजनीनमस्यचारित्र्य
मालोक्यविसिस्मयेच ॥ २४ ॥ रम्योपशल्यंकृतमालसालरसालहिंतालतमालशालैः ॥ सिद्धिस्थलंसाधकसं
पदांतन्मूकांबिकायाःसदनंजगाहे ॥ २५ ॥

इत्येवंयतौकथयत्येवब्राह्मणस्यसुतःसुखंसुप्तइवोत्थितःसर्वस्मैजनायहितंसार्वजनीनमस्यश्रीशंकरस्यचारित्र्यमालोक्य समीपगैर्विशे स्मयश्चप्राप्तः सर्वजनादिभ्यःठञ्खश्चेतिखः ॥ २४ ॥ कृतमालैःसालादिवृक्षविशेषैः रम्यमुपशल्यंग्रामांतंयस्य ग्रामांतमुपशल्यं धकसंपदांसिद्धिस्थलंतन्मूकांबिकायाःसदनंजगाहे ॥ व० ॥ २५ ॥

उच्चोब्रह्मलोकानंदोऽवचोनीचोयस्मात्तथाभूतानंदजन्यंबाष्पमुच्चैरुद्गीर्णरोमांचंचयथास्यात्तथोदारभक्तिः सःश्रीशंकरइहत्
वामंबांपूजयन्निस्तुलंनिरुपमंयथास्यात्तथास्तुतवान् ॥ इंद्र१ ॥ २६ ॥ स्तुतिमेवदर्शयति परार्द्धस्यपरार्द्धसंख्यायाःपारंता
चरणकमलभासोमयूखास्तासुषष्ट्युत्तरंत्रिशतंतुभासोवह्निसूर्यचंद्रानाविश्यजगंत्यालोकवंत्यादधतेकुर्वंति भासस्तुअणिमा
रित्यादिवदताश्रीनाथेनोक्तावेदितव्याः ॥ २७ ॥ हेदेविमहांतोंऽतर्मनसि आवाहनासनारोपणसुगंधितैलाभ्यंगमज्जनशालाप्रवे

उच्चावचानंदजबाष्पमुच्चैरुद्गीर्णरोमांचमुदारभक्तिः ॥ अंबामिहापारकृपावलंबांसंभावयन्नस्तुतनिस्तुलं
सः॥ २६॥ पारेपरार्द्धपदपद्मभास्सुषष्ट्युत्तरंतेत्रिशतंतुभासः॥ आविश्यवह्न्यर्कसुधामरीचीनालोकवंत्याद
धतेजगंति॥ २७॥ अंतश्चतुःषष्ट्युपचारभेदैरंतेवसत्कांडपटप्रदानैः॥ आवाहनाद्यैस्तवदेविनित्यमाराधना
मादधतेमहांतः॥ २८॥ अंबोपचारेष्वधिसिंधुषष्टिशुद्धाज्ञयोःशुद्धिदमेकमेकं॥ सहस्रपत्रेद्वितयेचसाधुतन्वं
तिधन्यास्तवतोषहेतोः॥ २९॥

षष्ट्युपचारभेदैस्तथांतेवसत्कांडपटप्रदानैरंतेवसतांकांडपटानांदूष्याधोलंबिवायुसंचारार्थानांपटानांप्रदानैर्हेदेविमहांतोनित्यमाराधनामादध
तेकुर्वंति अपटीकांडपटःस्यादितिवैजयंती ॥ २८ ॥ किंचहेंबचतुःषष्ट्युपचारेषुमध्येएकमेकमुपचारंशुद्धाज्ञयोर्द्वितयेसहस्रदलेध्रुवमंडलसंज्ञे
पद्मेचधन्याःपुरुषास्तवतोषार्थंसाधुसम्यक्तन्वंतिविस्तारयंति ॥ उ० ॥ २९ ॥

हेंऽबकेचित्याकृतास्तवाराधनंबहिरेवकुर्युरेकतमेमध्यमास्त्वंतर्बहिश्चैवान्येउत्तमास्त्वंतरेवापरेऽत्युत्तमास्तत्त्वविदस्तु हेअंब कदापिनकुर्युः कुतइति चेत्तत्राह यतस्त्वदैक्यानुभवैकनिष्ठास्त्वयासहस्वस्य पदैक्यंतस्यानुभवेविज्ञानेमुख्यानिष्ठायेषांते ॥ इंद्र० ॥ ३० ॥ हौंआधारशक्तिः १ यँधूम्रार्चिः २ रंउष्मा ३ लंज्वलिनी ४ वंज्वालिनी ५ शंविस्फुलिंगिनी ६ षंसुश्रीः ७ संसूपाया ८ हँकविता ९ हंकव्यवाहा १० कँभँतपिनी ११ खवंतापिनी १२ गंफंधूम्रा १३ षंपंमरीची १४ डं नंज्वालिनी १५ चंधंरुचिः १६ छंदंसुषुम्ना १७ जंथंभोगदा १८ जंतंवि

आराधनंतेबहिरेवकेचिदंतर्बहिश्चैकतमेंतरेव ॥ अन्येपरेत्वंबकदापिकुर्युर्नैवत्वदैक्यानुभवैकनिष्ठाः ॥ ३० ॥ अष्टोत्तरत्रिंशतियाःकलास्तास्वर्ध्याःकलाःपंचनिवृत्तिमुख्याः ॥ तासामुपर्यंबतवांघ्रिपद्मंविद्योतमानंविबुधाभजंते ॥ ३१ ॥

श्वा १९ जंणंबोधिनी २० रंहंधारिणी २१ णंवंक्षमा २२ अंअमृता २३ आंमानदा २४ इंपुष्या २५ ईंतुष्टिः २६ उंपुष्टिः २७ ... २८ ऋंधृतिः २९ ॠंशशिनी ३० लृंचंद्रिका ३१ ॡंकांतिः ३२ एंज्योत्स्ना ३३ ऐंश्रीः ३४ ओंप्रीतिः ३५ औंगदा ३६ ... अः पूर्णामृता ३८ इत्येतायाअष्टोत्तरत्रिंशतिकलास्तासुपंचकलाबोधिनीप्रमुखानिवृत्तिप्रधानास्तासामुपरि हेंऽबविद्योतम... चरणारविंदंविबुधाःदेवाःपंडिताश्चभजंते ॥ ३१ ॥

यतस्त्वदीयभजनंसृष्टिकर्तृत्वादिसामर्थ्यसंपादकमित्याह कालाग्निरूपेणजगंतिदग्ध्वासुधात्मनाप्लाव्यसमुत्सृजंतीमम्रुता
येध्यायंति तेसृष्टिकर्त्तारोभवंतीतियोजना ॥ उ० ॥ ३२ ॥ तथाचयेसविशेषांत्वामेवंध्यायंतेतएवंभूताभवंति येतुनिर्वि
तितेतुधन्याएवेत्याह येतुगुरूक्त्यादौविदितांसमाधियोगात्सैवाहमस्मीतित्वांप्रत्यभिज्ञाविषयंविदध्युस्तेसच्चिदानंदलक्षण
भिज्ञामतस्याद्वैतमतस्यपारंजानंतीतितेतथाभूताधन्याइत्यर्थः ॥ इं० ॥ ३३ ॥ इदानींतत्तच्चतेध्यानस्यफलंवदन्स्तौति ऐहिक

कालाग्निरूपेणजगंतिदग्ध्वासुधात्मनाप्लाव्यसमुत्सृजंतीं ॥ येत्वामवंतीमम्रुतात्मनैवध्यायंतितेसृष्टिकृतोभवं
ति ॥ ३२ ॥ येप्रत्यभिज्ञामतपारविज्ञाधन्यास्तुतेप्राग्विदितांगुरूक्त्या ॥ सैवाहमस्मीतिसमाधियोगात्त्वांप्रत्यभि
ज्ञाविषयंविदध्युः ॥ ३३ ॥ आधारचक्रेचतदुत्तरस्मिन्नाराधयंत्यैहिकभोगलुब्धाः ॥ उपासतेयेमणिपूरकेत्वांवा
सस्तुतेषांनगराद्बहिस्ते ॥ ३४ ॥ अनाहतेदेविभजंतियेत्वामंतःस्थितिस्त्वन्नगरेतुतेषां ॥ शुद्धाज्ञयोर्यैतुभजंतितेषांक्र
मेणसामीप्यसमानभोगौ ॥ ३५ ॥ सहस्रपत्रेध्रुवमंडलाख्येसरोरुहेत्वामनुसंदधानः ॥ चतुर्विधैकानुभवास्त
मोहःसायुज्यमंवांचतिसाधकेंद्रः ॥ ३६ ॥

मनिभेचतुर्दलेमूलाधारसंज्ञेचक्रेतथातस्मादाधारचक्रादुत्तरस्मिन्षड्दलेविद्रुमाभेस्वाधिष्ठानसंज्ञेआराधयंते येतुदशदलेधूम्रवर्णेमणिपूरकाख्ये
त्वामुपासते तेषांतुवासस्त्वनगराद्बहिरेवभवति ॥ उ० ॥ ३४ ॥ हेदेव्यनाहतसंज्ञेद्वादशदलेपिंगलवर्णेचक्रेतुयेत्वांभजंतितेषांतुत्वन्नगरेंतःस्थि
तिः शुद्धेषोडशदलेधूम्रवर्णेविशुद्धसंज्ञेचक्रेतुयेभजंतितेषांसामीप्यं सहस्रदलेकर्पूरवर्णेआज्ञाचक्रेयेभजंतितेषांत्वत्समानोभोगोभवति ॥ ३५ ॥
ध्रुवमंडलाख्येसहस्रपत्रेकमलेत्वामनुसंदधानःचतुर्विधैक्यानुभवेननिरस्तोमोहोयस्यसअतएवसाधकेंद्रोहेंऽबसायुज्यंप्राप्नोति ॥ ३६ ॥

अनुभवस्यचातुर्विध्यंविवृणोति पुरआदौ बिंदुत्रिकोणवसुकोणदशारयुग्ममन्वस्रनागदशसंयुतषोडशारं वृत्तत्रयंचधरणीसदनत्रयंचश्रीच क्रमेतदुदितंपरदेवतायाः चतुर्भिःशिवचक्रैश्चशक्तिचक्रैश्चपंचभिः नवचक्रैश्चसंसिद्धंश्रीचक्रंशिवयोर्वपुः त्रिकोणमष्टकोणंचदशकोणद्वयंत था चतुर्दशारंचैतानिशक्तिचक्राणिपंचच बिंदुश्चाष्टदलंपद्मंतथाषोडशपत्रकं चतुरस्रंचतुर्द्वारंशिवचक्राण्यनुक्रमात् त्रिकोणेचैंदवेश्लिष्टमष्टा रेष्टदलांबुजं दशारयोःषोडशारंभूगृहंभुवनास्रके शैवानामपिशाक्तानांचक्राणांचपरस्परं अविनाभावसंबंधंयोजानातिसचक्रवित् त्रिकोण रूपिणीशक्तिर्बिंदुरूपःसदाशिवः अविनाभावसंबंधंतस्माद्बिंदुत्रिकोणयोः एवंविभागमज्ञात्वाश्रीचक्रंयःसमर्चयेत् नतत्फलमवाप्नोतिलुलि

श्रीचक्रपट्चक्रकयोःपुरोथश्रीचक्रमन्वोरपिचिंतितैक्यं ॥ चक्रस्यमंत्रस्यततस्तवैक्यंक्रमादनुध्यायतिसाध केंद्रः ॥ ३७ ॥ इतितांवचनैःप्रपूज्यभैक्षोदनमात्रेणसतुष्टिमाकृतार्थः ॥ बहुसाधकसंस्तुतःकियंतंसमयंतत्र निनायशांतचेताः ॥ ३८ ॥ अयतिस्मततोग्रहारकंश्रीवलिसंज्ञंसकदाचनस्वशिष्यैः ॥ अनुगेहहुताग्निहोत्र दुग्धप्रसरत्पावनगंधलोभनीयं ॥ ३९ ॥

तावानतुष्यति इत्यादिवचनैरुक्तस्यश्रीचक्रस्योक्तचक्रषट्कस्यचचिंतितंयोगिभिःस्मृतमैक्यंसाधकेंद्रोऽनुध्यायति अथानंतरंश्री पिचिंतितैक्यमनुध्यायति ततस्तदनंतरंचक्रस्यतवैक्यंमंत्रस्यचैक्यमित्येवंक्रमादनुध्यायति ॥ ३७ ॥ उपसंहरतीति कियं नीतवान् ॥ उपें० ॥ ३८ ॥ ततःकदाचित्स्वशिष्यैःसहश्रीशंकरःश्रीवलीतिसंज्ञायस्यतंद्विजग्रामकंश्रयतिस्म तंविशिनष्टि त्रदुग्धात्प्रसरतापावनेनगंधेनलोभनीयंप्रार्थ्यं विषमेससजागुरुःसमेचेत्सभरायश्चवसंतमालिकासा ॥ ३९ ॥

पुनस्तमेववर्णयति शनकैर्भ्रांत्वा निजकर्मनिष्ठान्दूरान्निषिद्धंत्यजतःप्रमादशून्यान्द्विजातीन्नरान्दृष्ट्वा प्रदेशमलब्ध्वाऽ
ति ॥ उ० ॥ ४० ॥ यस्मिन्नाहिताग्नीनांवेदपाठकानांजनानांद्विसहस्रमवश्यंवेदविहितासुक्रियासुदक्षंप्रथितप्रभावंवसति
रिजासहायःपिनाकपाणिर्मध्येवसन्यस्यभूषांकरोति तत्रदृष्टांतद्वयमाह यथाहारस्ययष्टेर्लतिकायाःतरलोमध्यमणिःयथा
श्चंचलेखिगेभास्करेपित्रिलिंगकः हारमध्यमणौपुंसीतिमेदिनी यथावा गगनाधिरूढश्चंद्रोरात्रेर्भूषांकरोतितद्वत् ॥ ४२ ॥ तत्रतस्मि

यतोपमृत्युर्बहिरेवयातिभ्रांत्वाप्रदेशंशनकैरलब्ध्वा॥दृष्ट्वाद्विजातीन्निजकर्मनिष्ठान्दूरान्निषिद्धंत्यजतोऽप्रमत्ता
न्॥४०॥ यस्मिन्सहस्रद्वितयंजनानामभ्याहितानांश्रुतिपाठकानां॥वसत्यवश्यंश्रुतिचोदितासुक्रियासुदक्षंप्र
थितानुभावं॥४१॥ मध्येवसन्यस्यकरोतिभूषांपिनाकपाणिर्गिरिजासहायः॥ हारस्ययष्टेस्तरलोयथावैरात्रेरि
वेंदुर्गगनाधिरूढः॥४२॥ तत्रद्विजःकश्चनशास्त्रवेदीप्रभाकराख्यःप्रथितानुभावः॥ प्रवृत्तिशास्त्रैकरतःसुबुद्धिरा
स्तेक्रतून्मीलितकीर्त्तिवृंदः॥४३॥ गावोहिरण्यंधरणीसमग्रासद्वांधवाज्ञातिजनाश्चतस्य॥ संत्येवकिंतैर्नहितोष
एभिःपुत्रोयदस्याजनिमुग्धचेष्टः ॥ ४४ ॥ नवक्तिकिंचिन्नशृणोतिकिंचित्ध्यायन्निवास्तेकिलमंदचेष्टः ॥ रूपे
पुमारोमहसामहस्वान्मुखेनचंद्रःक्षमयामहीसमः॥ ४५॥

स्त्रज्ञःप्रभाकरसंज्ञःकश्चनास्तेस्म तंविशिनष्टि प्रवृत्तीति क्रतुभिरुन्मीलितंकीर्त्तिवृंदंयेनसः ॥ ४३ ॥ तैःसद्भिःकिं नकिमपि हियस्मादेभिःसर्वै
स्तोषोनास्ति तोषाभावेहेतुर्यद्यस्मादस्यपुत्रोमुग्धचेष्टोऽजनि ॥ इंद्र० ॥ ४४ ॥ तदीयांतांचेष्टामेवदर्शयति नेति तदीयंरूपंवर्णयति रूपेपुमा
रःकामः महसातेजसामहस्वान्सूर्यः ॥ उ० ॥ ४५ ॥

अधुनातत्पितृचेष्टांदर्शयति तत्पिताइत्येवमनिशंसंचिंतयन् समागतान्बहुश्रुतान्प्रष्टुमनास्तिष्ठतिस्म ॥ ४६ ॥ ततःकदाचिद्बहुपुस्तकभारैः शिष्यैःसहतंग्रामंप्रतिसमागतंकंचनपूज्यपादंशुश्राव ततश्चानिंदितात्मासप्रभाकरस्तस्यपूज्यपादस्यनिकटंपुत्रंनीतवान् ॥ आ० ॥ ४७ ॥ किंशून्यहस्तएवगतोनेत्याह शून्यहस्तइति रिक्तहस्तस्तुनोपेयाद्राजानंदैवतंगुरुमितिशास्त्रवित्स्वयंसोपायनोगुरुंश्रीशंकरंप्राप किंतदुपायनमित्यपेक्षायामाह फलंव्यशिश्रणत्प्रायच्छत् अस्यगुरोःपादकमलेननामच ॥ उ० ॥ ४८ ॥ भस्मनानिगूढवह्निवज्जडतुल्याकृतिंतंपुत्रंचतदीयपा

ग्रहग्रहात्किंजडवद्विचेष्टतेकिंवास्वभावादुतपूर्वकर्मणः ॥ संचिंतयंस्तिष्ठतितत्पितानिशंसमागतान्प्रष्टुमनाबहुश्रुतान् ॥ ४६ ॥ शिष्यैःप्रशिष्यैर्बहुपुस्तभारैःसमागतंकंचनपूज्यपादं ॥ शुश्रावतंग्राममनिंदितात्मानिनायसूनुंनिकटंसतस्य ॥ ४७ ॥ नशून्यहस्तोनृपमिष्टदैवंगुरुंचयायादितिशास्त्रवित्स्वयं ॥ सोपायनःप्रापगुरुंव्यशिश्रणत्फलंननामास्यचपादपंकजे ॥ ४८ ॥ अनीनमत्तंचतदीयपादयोर्जडाकृतिंभस्मनिगूढवह्निवत् ॥ सनोदतिष्ठत्पतितःपदांबुजेप्रायःस्वजाड्यंप्रकटंविधित्सति ॥ ४९ ॥ उपात्तहस्तःशनकैरवाङ्मुखंतंदेशिकेंद्रःकृपयोदतिष्ठयत् ॥ उत्थापितेस्वेतनयेपिताब्रवीद्वदप्रभोजाड्यममुष्यकिंकृतं ॥ ५० ॥ वर्षाण्यतीयुर्भगवन्नमुष्यपंचाष्टजातस्यविनावबोधं ॥ नाध्यष्टवेदानलिखच्चनार्णानचीकरंचोपनयंकथंचित् ॥ ५१ ॥

दयोरनीनमत् भस्मनीतिभिन्नंवापदं सपुत्रःप्रायःस्वजाड्यंप्रकटंविधातुंइच्छति ॥ ४९ ॥ उपात्तोगृहीतस्तदीयहस्तोयेन सदेशि... रःउदतिष्ठयत् उत्थापितवान् ॥ ५० ॥ तज्जाड्यमेववर्णयति वर्षाणीति पंचाष्टत्रयोदश नाध्यष्ट नैवाधीतवान् अर्णान्व... नयंकृतवानस्मि ॥ ५१ ॥

एवंजाड्यंप्रदर्श्याद्भुतांतस्यचेष्टांवर्णयति क्रीडापरइतिद्वाभ्यां ॥ ५२ ॥ यद्यप्येवंतथापिरुष्टेनममायंनताड्यते ॥ ५३ ॥
करेउपरते सतंशंकरदेशिकेंद्रःपप्रच्छ ॥ ५४ ॥ कस्त्वमितिप्रश्नस्योत्तरंवक्तुमादौकिमेवंजडवत्प्रवृत्तःइत्यत्राह नाहंजड
डःप्रवर्त्तते हेगुरोऽस्मिन्नर्थेअहंनसंदिहे तस्मात्शोकमोहक्षुधापिपासाजरामृत्युलक्षणषडूर्मिभिर्जायतेऽस्तिवर्द्धतेविपरिण

क्रीडापरःक्रोशतिबालवर्गस्तथापिनक्रीडितुमेषयाति ॥ बालाःशठामुग्धमिमंनिरीक्ष्यसंताडयंतेऽपिनरो
षमेति॥ ५२ ॥ भुंक्तेकदाचिन्नतुजातुभुंक्तेस्वेच्छाविहारीनकरोतिचोक्तं ॥ तथापिरुष्टेननताड्यतेऽयंस्वकर्म
णावर्धतएवनित्यं॥ ५३ ॥ इतीरयित्वोपरतेचविप्रेपप्रच्छतंशंकरदेशिकेंद्रः ॥ कस्त्वंकिमेवंजडवत्प्रवृत्तःस
चाब्रवीद्बालवपुर्महात्मा॥ ५४ ॥ नाहंजडःकिंतुजडःप्रवर्ततेमत्संनिधानेननसंदिहेगुरो ॥ षडूर्मिषड्भाववि
कारवर्जितंसुखैकतानंपरमस्मितत्पदं॥ ५५॥

त्युक्तषड्भावविकारैश्चरहितं सुखैकतानंपरंसर्वोत्तमं तत्पदमहमस्मि परंदेहेंद्रियाद्यतिरिक्तंप्रत्यक्चैतन्यंतत्पदंशोधिततत्पदार्थाभिन्नमितिवा
॥ ५५॥ हेविद्वन् ममैवैषाऽनुभूतिर्मुमुक्षुवर्गस्यभूयादितिनिरूप्यान्यैर्द्वादशभिःपद्यैर्विधुतप्रपंचचिदात्मतत्त्वंबभाषे तथाहि निमित्तंमनश्चक्षुरादि

प्रवृत्तौनिरस्ताखिलोपाधिराकाशकल्पः रविर्लोकचेष्टानिमित्तंयथायःसनित्योपलब्धिस्वरूपोऽहमात्मा ॥ १ ॥ यमग्न्युष्णवन्नित्यबोधस्वरूपं
मनश्चक्षुरादीन्यबोधात्मकानि प्रवर्त्तंतआश्रित्यनिष्कंपमेकं स॰ ॥ २ ॥ मुखाभासकोदर्पणेदृश्यमानोमुखत्वात्पृथक्त्वेननैवास्तिवस्तु चिदा
भासकोधीषुजीवोपितद्वत् स॰ ॥ ३ ॥ यथादर्पणाभावआभासहानौमुखंविद्यतेकल्पनाहीनमेकं तथाधीवियोगेनिराभासकोयः स॰
॥ ४ ॥ मनश्चक्षुरादेर्वियुक्तःस्वयंयोमनश्चक्षुरादेर्मनश्चक्षुरादिः मनश्चक्षुरादेरगम्यस्वरूपः स॰ ॥ ५ ॥ यएकोविभातिस्वतःशुद्धचेताःप्रका
शस्वरूपोऽपिनानेवधीषु सएवोदकस्थोयथाभानुरेकः स॰ ॥ ६ ॥ यथाऽनेकचक्षुःप्रकाशोरविर्नक्रमेणप्रकाशीकरोतिप्रकाश्यं अनेकाधि

ममैवभूयादनुभूतिरेषामुमुक्षुवर्गस्यनिरूप्यविद्वन् ॥ प
द्यैःपरैर्द्वादशभिर्विभाषेचिदात्मतत्त्वंविधुतप्रपंचं ॥ ५६ ॥

योयस्तथैकप्रबोधः स॰ ॥ ७ ॥ विवस्वत्प्रभातंयथारूपमक्षंप्रगृह्णातिनाभातमेवंविवस्वान् तथाभातआभासयत्येकमक्षं स॰ ॥
थासूर्यएकोप्यनेकश्चलासुस्थिरास्वप्यनन्वग्विभाव्यस्वरूपः चलासुप्रभिन्नास्वधीष्वेकएव स॰ ॥ ९ ॥ घनच्छन्नदृष्टिर्घनच्छन्न
न्यतेनिःप्रभंचातिमूढः तथाबद्धवद्भातियोमूढदृष्टेः स॰ ॥ १० ॥ समस्तेषुवस्तुष्वनुस्यूतमेकःसमस्तानिवस्तूनियंनस्पृशंति
च्छस्वरूपः स॰ ॥ ११ ॥ उपाधौयथाभेदतासन्मणीनांतथाभेदताबुद्धिभेदेषुतेऽपि यथाचंद्रिकाणांजलेचंचलत्वंतथ
ण्णो ॥ १२ ॥ इतिउपदेशः ॥ ५६ ॥

पुनस्तमेववर्णयति शनकैर्भ्रांत्वानिजकर्मनिष्ठानूदूरान्निषिद्धंत्यजतःप्रमादशून्यानूद्विजातीन्नरानूदृष्ट्वा प्रदेशमलब्ध्वाऽ
ति ॥ उ० ॥ ४० ॥ यस्मिन्नाहिताग्नीनांवेदपाठकानांजनानांद्विसहस्रमवश्यंवेदविहितासुक्रियासुदक्षंप्रथितप्रभावंवसति
रिजासहायःपिनाकपाणिर्मध्येवसन्यस्यभूषांकरोति तत्रदृष्टांतद्वयमाह यथाहारस्ययष्टेर्लतिकायाःतरलोमध्यमणिःयथा
श्चंचलेरविगेभास्करेपित्रिलिंगकः हारमध्यमणौपुंसीतिमेदिनी यथावा गगनाधिरूढश्चंद्रोरात्रेर्भूषांकरोतितद्वत् ॥ ४२ ॥ तत्रतस्मि

यतोपमृत्युर्बहिरेवयातिभ्रांत्वाप्रदेशंशनकैरलब्ध्वा॥दृष्ट्वाद्विजातीन्निजकर्मनिष्ठान्दूरान्निषिद्धंत्यजतोऽप्रमत्ता
न्॥४०॥ यस्मिन्सहस्रद्वितयंजनानामग्न्याहितानांश्रुतिपाठकानां॥वसत्यवश्यंश्रुतिचोदितासुक्रियासुदक्षंप्र
थितानुभावं॥४१॥ मध्येवसन्यस्यकरोतिभूषांपिनाकपाणिर्गिरिजासहायः॥ हारस्ययष्टेस्तरलोयथावैरात्रेरि
वेंदुर्गगनाधिरूढः॥४२॥ तत्रद्विजःकश्चनशास्त्रवेदीप्रभाकराख्यःप्रथितानुभावः॥ प्रवृत्तिशास्त्रैकरतःसुबुद्धिरा
स्तेक्रतून्मीलितकीर्त्तिवृंदः॥४३॥ गावोहिरण्यंधरणीसमग्रासद्वांधवाज्ञातिजनाश्चतस्य॥ संत्येवकिंतैर्नहितोष
एभिःपुत्रोयदस्याजनिमुग्धचेष्टः ॥ ४४ ॥ नवक्तिकिंचिन्नशृणोतिकिंचिद्ध्यायन्निवास्तेकिलमंदचेष्टः ॥ रूपे
पुमारोमहसामहस्वान्मुखेनचंद्रःक्षमयामहीसमः॥ ४५॥

ख्यःप्रभाकरसंज्ञःकश्चनास्तेस्म तंविशिनष्टि प्रवृत्तीति क्रतुभिरुन्मीलितंकीर्त्तिवृंदंयेनसः ॥ ४३ ॥ तैःसद्भिःकिं नकिमपि हियस्मादेभिःसर्वै
स्तोषोनास्ति तोषाभावेहेतुर्यद्यस्मादस्यपुत्रोमुग्धचेष्टोऽजनि ॥ इंद्र० ॥ ४४ ॥ तदीयांतांचेष्टामेवदर्शयति नेति तदीयंरूपंवर्णयति रूपेपुमा
रःकामः महसातेजसामहस्वान्सूर्यः ॥ उ० ॥ ४५ ॥

अधुनातत्पितृचेष्टांदर्शयति तत्पिताइत्येवमनिशंसंचिंतयन् समागतान्बहुश्रुतान्प्रष्टुमनास्तिष्ठतिस्म ॥ ४६ ॥ ततःकदाचिद्बहुपुस्तकभारैः शि
ष्यैःसहतंग्रामंप्रतिसमागतंकंचनपूज्यपादंशुश्राव ततश्चानिंदितात्मासप्रभाकरस्तस्यपूज्यपादस्यनिकटंपुत्रंनीतवान् ॥ आ० ॥ ४७ ॥ किं
शून्यहस्तएवगतोनेत्याह शून्यहस्तइति रिक्तहस्तस्तुनोपेयाद्राजानंदैवतंगुरुमितिशास्त्रवित्स्वयंसोपायनोगुरुंश्रीशंकरंप्राप किंतदुपायनमित्य
पेक्षायामाह फलंव्यशिश्रणत्प्रायच्छत् अस्यगुरोःपादकमलेननामच ॥ उ० ॥ ४८ ॥ भस्मनानिगूढवह्निवज्जडतुल्याकृतितंपुत्रंचतदीयपा

ग्रहग्रहात्किंजडवद्विचेष्टतेकिंवास्वभावादुतपूर्वकर्मणः ॥ संचिंतयंस्तिष्ठतितत्पितानिशंसमागतान्प्रष्टुमनाब
हुश्रुतान् ॥ ४६ ॥ शिष्यैःप्रशिष्यैर्बहुपुस्तभारैःसमागतंकंचनपूज्यपादं ॥ शुश्रावतंग्राममनिंदितात्मानिनाय
सूनुंनिकटंसतस्य ॥ ४७ ॥ नशून्यहस्तोनृपमिष्टदैवंगुरुंचयायादितिशास्त्रवित्स्वयं ॥ सोपायनःप्रापगुरुंव्यशि
श्रणत्फलंननामास्यचपादपंकजे ॥ ४८ ॥ अनीनमत्तंचतदीयपादयोर्जडाकृतिंभस्मनिगूढवह्निवत् ॥
सनोदतिष्ठत्पतितःपदांबुजेप्रायःस्वजाड्यंप्रकटंविधित्सति ॥ ४९ ॥ उपात्तहस्तःशनकैरवाङ्मुखंतंदेशिकेंद्रःकृ
पयोदतिष्ठयत् ॥ उत्थापितेस्वेतनयेपिताब्रवीद्वदप्रभोजाड्यममुष्यकिंकृतं ॥ ५० ॥ वर्षाण्यतीयुर्भगवन्नमुष्य
पंचाष्टजातस्यविनाववोधं ॥ नाध्यष्टवेदानलिखच्चनार्णानचींकरंचोपनयंकथंचित् ॥ ५१ ॥

दयोरनीनमत् भस्मनीतिभिन्नंवापदं सपुत्रःप्रायःस्वजाड्यंप्रकटंविधातुंइच्छति ॥ ४९ ॥ उपात्तोगृहीतस्तदीयहस्तोयेन सते[...]
रःउदतिष्ठयत् उत्थापितवान् ॥ ५० ॥ तज्जाड्यमेववर्णयति वर्षाणीति पंचाष्टत्रयोदश नाध्यष्ट नैवाधीतवान् अर्णान्व[...]
नयंकृतवानस्मि ॥ ५१ ॥

यदेकंपरमात्मतत्त्वंतत्करस्थामलकफलवत्प्रकाशयंतेऽतस्ते श्लोकास्तुहस्तामलकाःप्रसिद्धास्तेषांकर्तुराख्यापितथैवहस्ताम
त्ता ॥ उ० ॥ ५७ ॥ उपदेशंविनास्वतएवद्विजवर्यसूनोःपरात्मबोधोजातइतिसंप्रेक्ष्य विस्मयंप्राप्तोदेशिकेंद्रोद्विजवर्यस्
धात् ॥ ५८ ॥ उदाहृतपद्यान्युक्त्वा सुतेनिवृत्तेसतिदेशिकेंद्रस्तदीयंपितरंवचनंबभाषे तदाह भवतासहायंवस्तुंयोग्योनभव...

प्रकाशयंतेपरमात्मतत्त्वंकरस्थधात्रीफलवद्यदेकं ॥ श्लोकास्तुहस्तामलकाःप्रसिद्धास्तत्कर्तुराख्यापितथै
ववृत्ता॥५७॥ विनोपदेशंस्वतएवजातःपरात्मबोधोद्विजवर्यसूनोः॥ व्यस्मयेष्टसंप्रेक्ष्यसदेशिकेंद्रोन्यधात्स्व
हस्तंकुपयोत्तमांगे॥५८॥ सुतेनिवृत्तेवचनंबभाषेसदेशिकेंद्रःपितरंतदीयं ॥ वस्तुंनयोग्योभवतासहायंन
तेऽमुनार्थोजडिमास्पदेन॥५९॥ पुराभवाभ्यासवशेनसर्वंसवेत्तिसम्यक्नचवक्तिकिंचित् ॥ नोचेत्कथं
स्वानुभवैकगर्भंपद्यानिभाषेतनिरक्षरास्यः॥६०॥ नसक्तिरस्यास्तिगृहादिगोचरानात्मीयदेहभ्रमतोऽस्यवि
द्यते॥ तादात्म्यतान्यत्रममेतिवेदनंयदानसास्वेकिमुबाह्यवस्तुषु॥६१॥

तास्पदेनतवकिंचित्प्रयोजनंनास्ति ॥ ५९ ॥ नन्वेवंभूतेनतवापिकिंप्रयोजनमित्याशंक्याह पुराभवस्यपूर्वजन्मनोऽभ्यासस्यवशेनसतवपुत्रः
सर्वंजानाति ॥ ६० ॥ नवस्तुंयोग्योभवतासहायमित्यत्रहेतुमाह अस्यगृहादिविषयासक्तिरासक्तिर्नास्ति तथात्मीयदेहेभ्रमात्तादात्म्यतास्यन
विद्यते तथादेहादन्यत्रममेतिज्ञानमस्यनविद्यते सातादात्म्यतातुयदास्वेदेहेनास्तितदाबाह्यवस्तुषुसानास्तीतिकिमुवक्तव्यं ॥ ६१ ॥

इतीरयित्वाभगवान्द्विजात्मजंगृहीत्वापुनरीप्सितांदिशंययौ प्रभाकरसंज्ञोविप्रोऽपिकियत्प्रदेशमनुव्रज्यस्वमंदिरंययौ ननुस्वपुत्रवियोगेव्या
कुलतांकिमितिनप्रापेत्याशंक्याह स्थिरधीर्यतोबहुश्रुतः ॥ ६२ ॥ ततस्तदनंतरंविष्णुप्रमुखैर्देववृंदैरुपगीयमानःपद्मपादादिभिःसहाप्तकामोरा
जाश्रृंगगिरिंप्रतस्थे शतानंदोमुनेर्भेदेदेवकीनंदनेऽपिचेतीमेदिनी ॥६३॥ यस्मिन्श्रृंगगिरावधुनापिआत्मभृतामंतरंगःऋष्यश्रृंगउत्तमंतपश्चरतिय
त्रचसंस्पर्शमात्रेणवितीर्णंसमर्पितंभद्रंकल्याणंययासातुंगभद्राख्यानदीविद्योतते ॥ ६४ ॥ यत्रयेसंतोवसंतितान्विशिनष्टि अभ्यागतानांपू

इतीरयित्वाभगवान्द्विजात्मजंययौगृहीत्वादिशमीप्सितांपुनः ॥ विप्रोप्यनुव्रज्यययौस्वमंदिरंकियत्प्रदेशं
स्थिरधीर्बहुश्रुतः ॥ ६२ ॥ ततःशतानंदमहेंद्रपूर्वैःसुपर्ववृंदैरुपगीयमानः ॥ पद्मांघ्रिमुख्यैःसममाप्तकामःक्षो
णीपतिःश्रृंगगिरिंप्रतस्थे ॥ ६३ ॥ यत्राधुनाप्युत्तममृष्यश्रृंगस्तपश्चरत्यात्मभृदंतरंगः ॥ संस्पर्शमात्रेणविती
र्णभद्राविद्योततेयत्रचतुंगभद्रा ॥ ६४ ॥ अभ्यागतार्चाल्पितकल्पशाखाकूलंकषाधीतसमस्तशाखाः ॥ ई
ज्याशतैर्यत्रसमुल्लसंतःशांतांतरायानिवसंतिसंतः ॥ ६५ ॥ अध्यापयामाससभाष्यमुख्यान्ग्रंथान्निजांस्त
त्रमनीषिमुख्यान् ॥ आकर्णनप्राप्यमहापुमर्थानादिष्टविद्याग्रहणेसमर्थान् ॥ ६६ ॥

जयाप्यल्पीकृतानांकल्पवृक्षशाखानांकूलंकषाधीताःसर्वशाखायैरिज्याशतैःसम्यगुल्लसंतःशांतांतरायाःशांतविघ्नाः ॥ इंद्र१
न्पर्वतेमनीषिमुख्यान्श्रवणमात्रेणप्राप्योमहापुरुषार्थोमोक्षोयैस्तानुपदिष्टविद्याग्रहणेसमर्थान्सश्रीशंकरोभाष्यप्रमुखा
यामासआकर्णनेनप्राप्योमहापुमर्थोयेभ्यस्तान्ग्रंथानितिवा ॥ ६६ ॥

शेषमनंतंमदाक्षनम्रंलज्जयानम्रंकलयन्नुकुर्वन्निवाशेषंयथास्यात्तथाप्राणिनामांतरतमांसिअज्ञानानिप्राणुदत्अपाकरोत्
निर्विशेषंयथाभवतितथानिरस्तंजीवेश्वरयोर्विशेषंव्याचष्ट ॥ ७० ॥ ६७ ॥ ततश्चतस्मिन्पर्वतइंद्रविमानसदृशमाविष्कृत
कल्प्याजाद्यैरपिपूजितायादेवतायाःपूजांसप्रवर्त्तयामास अत्रप्रांचःमठंकृत्वातत्रविद्यापीठनिर्माणंकृत्वा भारतीसंप्रदायंनिजशिष्य
स्वद्वैतमतेस्थित्वाभारतीपीठनिंदकः सयातिनरकंघोरंयावदाभूतसंप्लवं कंचिच्छिष्यंसुरेश्वराख्यंपीठाध्यक्षमकरोदिति ॥६८ ॥ सादेवताव

मंदाक्षनम्रंकलयन्नुशेषंपराणुदत्प्राणितमांस्यशेषं ॥ निरस्तजीवेश्वरयोर्विशेषंव्याचष्टवाचस्यतिनिर्विशेषं ॥
॥६७॥ प्रकल्प्यतत्रेंद्रविमानकल्पंप्रासादमाविष्कृतसर्वशिल्पं ॥ प्रवर्तयामाससदेवतायाःपूजामजाद्यैरपि
पूजितायाः॥ ६८ ॥ याशारदांवेत्यभिधांवहंतीकृतांप्रतिज्ञांप्रतिपालयंती ॥ अद्यापिश्रृंगेरिपुरेवसंतीप्रद्योतते
ऽभीष्टवरान्दिशंती॥ ६९ ॥ चित्तानुवर्तीनिजधर्मचारीभूतानुकंपीतनुवाग्विभूतिः ॥ कश्चिद्विनेयोजनिदेशि
कस्ययंतोटकाचार्यमुदाहरंति॥ ७० ॥स्नात्वापुराक्षिपतिकंबलवस्त्रमुख्यैरुच्चासनंमृदुसमंसददातिनित्यं ॥ सं
लक्ष्यदंतपरिशोधनकाष्टमग्र्यंबाल्याद्यादिकंगतवतेसलिलादिकंच॥ ७१ ॥ श्रीदेशिकायगुरवेतनुमार्जवस्त्रंविश्रा
णयत्यनुदिनंविनयोपपन्नः॥ श्रीपादपद्मयुगमर्दनकोविदश्वछायेवदेशिकमसौभ्रशमन्वयाद्यः॥ ७२॥

कांक्षायामाह येति ॥ ६९ ॥ अथतत्रयद्वृत्तंतद्दर्शयितुमारभते चित्तानुवर्तीति तन्वीसूक्ष्मावाग्विभूतिर्यस्यसमंदभाषणइत्यर्थः देशिकस्यक
श्चिच्छिष्योऽजनि॥७०॥ ससदैवगुरुशुश्रूषणपरइत्याह पुरागुरुस्नानात्पूर्वंस्नात्वाकंबलवस्त्रप्रमुखैरुच्चासनंमृदुकोमलंसमंसमानंक्षिपतिकरोति
तंतंकालंसंलक्ष्यैवनत्वाग्रमोनित्यंदंतपरिशोधनकाष्ठंअग्र्यंशास्त्रोक्तंददाति बाह्यादिकंगतवतेजलमृत्तिकादिचददाति ॥ ७०॥७१॥विश्राणयति
प्रयच्छतिस्म योसौदेशिकंछायेवान्वगच्छत् ॥ ७२ ॥

वंक्तव्यंनोपेक्षतेवाबहुवानभाषते वंशस्थेंद्रवंशामिश्रितत्वादुपजातिः इत्थंकिलान्यास्वपिमिश्रितासुस्मरंतिजातिष्विदमेवनामेत्युक्तत्वात् ॥ ७३ ॥
किंच गुरौतिष्ठतिसतितिष्ठन् तस्मिन्संप्रयातेगच्छन् ब्रुवाणेविनयेनशृण्वन्सन्नकथ्यमानोपिहितंविधत्ते यच्चास्यगुरोरहितंतच्चनविस्तारयति उ०
॥ ७४ ॥ एवंभूतेतस्मिञ्छिष्यवरेकदाचित्स्वशाटीप्रक्षालनायापवर्त्तनीगाःनदीजलानिप्रतिगतवतिसतितस्यागमनमीक्ष्यमाणोभक्तेषुवत्सलत

गुरोःसमीपेनतुजातुजृंभतेप्रसारयन्नोचरणौनिषीदति ॥ नोपेक्षतेवाबहुवानभाषतेनपृष्ठदर्शीपुरतोऽस्यति
ष्ठति ॥ ७३ ॥ तिष्ठन्गुरौतिष्ठतिसंप्रयातेगच्छन्ब्रुवाणेविनयेनशृण्वन् ॥ अनुच्यमानोऽपिहितंविधत्तेयच्चाहि
तंतच्चतनोतिनास्य ॥ ७४ ॥ तस्मिन्कदाचनविनेयवरेस्वशाटीप्रक्षालनायगतवत्यपवर्तनीगाः ॥ व्याख्या
नकर्मणितदागममीक्ष्यमाणोभक्तेषुवत्सलतयाविललंबएषः ॥ ७५ ॥ शांतिपाठमथकर्तुमसंख्येषूद्यतेषुस
विनेयवरेषु ॥ स्थीयतांगिरिरपिक्षणमात्रादेष्यतीतिसमुदीरयतिस्म ॥ ७६ ॥ तांनिशम्यनिगमांतगुरूक्तिं
मंदधीरनधिकार्यपिशास्त्रे ॥ किंप्रतीक्ष्यतइतिस्महभीतिःपद्मपादमुनिनासमदर्शि ॥ ७७ ॥

याव्याख्यानाख्येकर्मणिविललंब गौःस्वर्गेचबलीवर्देरश्मौचकुलिशेपुमान् स्त्रीसौरभेयीदृग्बाणदिग्वाग्भूम्यप्सुभूम्निचेतिमेदिनी ॥ अ
अथानंतरमसंख्यातेषुशिष्यवरेषुशांतिपाठंकर्तुंउद्यतेषुसत्सु सदेशिकेंद्रःस्थीयतांगिरिरपिक्षणमात्रादेष्यतीतिगिरतिस्म ॥ स्वा
दांतरूपांगुरूक्तिंनिशम्यमंदबुद्धित्वाद्भीतिःकुड्यतुल्योजडःशास्त्रेऽनधिकार्यपिकिमर्थंप्रतीक्ष्यतइतिस्महपद्मपादमुनिनाभी

अखर्वमनल्पं तस्यपद्मपादस्यगर्वमपाकर्तुंस्वयमेवआश्रयोयेषांतथाभूतेषुस्वभक्तेषुकरुणायाअतिशयाच्च सश्रीशंकरस्त
चतुर्दशविद्यामनसाआदिदेश ॥ ७८ ॥ सगिरिरयं अघ्यंतस्यगुरोरनुग्रहमधिगम्य तत्क्षणेन विदिताखिलविद्यः भगवन्नुदधौ
खदुःखझषेपतितंव्यथितं कृपयाशरणागतमुद्धरमामनुशाध्युपसन्नमनन्यगतिं ॥ १ ॥ विनिवर्त्यरतिंविषयेविषमांपरिमुच्यशरीरविवे
परमात्मपदेभवनित्यरतोजहिमोहमयंभ्रममात्ममते ॥ २ ॥ विसृजान्नमयादिषुपंचसुतामयमस्मिममेतिमतिंसततं दृशिरूपमनंतमजंविगु

तस्यगर्वमपहर्तुमखर्वंस्वाश्रयेषुकरुणातिशयाच्च ॥ व्यादिदेशसचतुर्दशविद्यास्सद्यएवमनसागि
रिनाम्ने ॥ ७८ ॥ सोधिगम्यतदनुग्रहमग्र्यंतत्क्षणेनविदिताखिलविद्यः ॥ एष्टदेशिकवरंपरतत्वव्यंज
कैर्ललिततोटकवृत्तैः ॥ ७९ ॥

दयस्थमवैहिसदाहमिति ॥ ३ ॥ जलभेदकृतावहुतेवरवेर्घटिकादिकृतानभसोपियथा मतिभेदकृतानुतथावहुतानवबुद्धिदृशोऽविकृतस्यसदा
॥ ४ ॥ दिनकृत्प्रभयासदृशेनसदाजनचित्तगतंसकलंस्वचिता विदितंभवताऽविकृतेनसदायतएवमतोसिसदेवसदा ॥ ५ ॥ इत्यादिभिर्गुरुशि
ष्यसंवादेनपरतत्वव्यंजकैरिहतोटकमंवुधिसैःप्रथितमित्युक्तलक्षणैस्तोटकवृत्तैःसह देशिकवरंश्रीशंकरं प्रत्यागतवानित्यर्थः स्वा० ॥ ७९ ॥

श्रीमद्देशिकस्यपादपंकजयुगलंमूलंयस्याः सश्रीशंकरएवएकआश्रयोयस्यास्तस्यकारुण्यसुधावसेकेनसहिता तस्यगिरेर्भक्तिलक्षणासद्व
ल्लरी तोटकवृत्तलक्षणेनवृत्तेनप्रबंधेन हृद्यंसुंदरं भोक्तुंमनोयेषांतैःसत्तमलक्षणैःशुकैर्मुहुरास्वाद्यमानं पद्यात्मकंफलंलेभे ॥ शा० ॥ ८० ॥
अत्रविस्मयोनकार्यइत्याशयेनाह येनौन्नत्यंप्रापितासती भूमौयथेष्टंकृतपदालब्धास्पदा अधरीकृतत्रिभुवनपंक्तिः गुर्वीश्रेष्ठा गुरूणांसेवा
उन्नतंपरंपदंमोक्षंगंतुमिच्छोः कापिवंशोद्भवानिःश्रेणिरधिरोहिणी तस्ययतीशितुर्गिरेस्तमोऽज्ञानंविरलंकथंनकुर्वीत ॥ ८१ ॥ अथानंतरमयम

श्रीमद्देशिकपादपंकजयुगीमूलातदेकाश्रयातत्कारुण्यसुधावसेकसहितातद्भक्तिसद्वल्लरी॥हृद्यंतोटकवृत्तवृ
त्तंरुचिरंपद्यात्मकंसत्फलंलेभेभोक्तुमनोतिसत्तमशुकैरास्वाद्यमानंमुहुः ॥ ८० ॥ येनौन्नत्यमवापिताकृतप
दाकामंक्ष्मायामियंनिःश्रेणिःपदमुन्नतंजिगमिषोर्व्योमस्पृशंतींपरं॥ वंश्याकाप्यधरीकृतत्रिभुवनश्रेणीगु
रूणांकथंसेवातस्ययतीशितुर्नविरलंकुर्वीतगुर्वींतमः ॥ ८१ ॥ अथतोटकवृत्तपद्यजातैरयमज्ञातसुपर्वसू
क्तिकोऽपि॥दययैवगुरोस्त्रयीशिरोर्थंस्फुटयन्नैक्षिविचक्षणःसतीर्थ्यैः ॥ ८२ ॥ अथतस्यबुधस्यवाक्यगुंफं
निशमय्यामृतमाधुरीधुरीणं॥ जलजांघ्रिमुखाःसतीर्थ्यवर्याःस्मयमन्वस्यसविस्मयाबभूवुः॥ ८३ ॥

ज्ञाताःसुप्रस्तावायासुतथाभूताःसूक्तयोयेन तथाभूतोऽपि पर्वक्लीबेयहेग्रंथौप्रस्तावेलक्षणांतरइतिमेदिनी गुरोर्दययैवतोटकवृत्तपद्यज
शिरसामर्थंस्फुटयन्सतीर्थ्यैर्गुरोःशिष्यैर्विचक्षणऐक्षिदृष्टः॥ वियो० ॥८२॥ अथानंतरंतस्यवाक्यानांसंदर्भममृतमाधुरीधुरीणं
प्रमुखाःसतीर्थ्यवर्याः गर्वंपरित्यज्य सविस्मयाबभूवुः ॥ ८३ ॥

तोटकाख्यपद्यप्रादुर्भावएवतदाख्याप्रवृत्तिनिमित्तमित्याह भक्तीति यतोऽस्माद्विरेःसंतिसमीचीनानितोटकसंज्ञानि
देनंशिष्टवंशप्रसूतं शिष्टावेदाचाररताः तोटकाचार्यमाहुः ॥ शालि० ॥ ८४ ॥ वेदांतवेद्यपरतत्त्वनिवेदनंयत्तत्प्रकरणमद्या
याप्रथितं तद्विशिनष्टि लघुसन्महांतोऽर्थायस्मिन्ननल्पानीतयोयुक्तयोयस्मिन्नतिश्रेष्ठपदैरनुविद्धंयुक्तंतदतएवशिष्टैर्गृहीतं ॥ व० ॥
हर्षैःश्रीशंकरात्तोटकाख्यामवाप्य तदारभ्यआशासुख्यातिमाप ॥ स्वा० ॥८६ ॥ हस्तामलकपद्मपादसुरेश्वरतोटकाख्येष्वाचार्यशिष्ये

भक्त्युत्कर्षात्प्रादुरासन्यतोस्मात्पद्यान्येवंतोटकाख्यानिसंति ॥ तस्मादाहुस्तोटकाचार्यमेनंलोकेशिष्टाःशि
ष्टवंश्यंमुनींद्रं ॥ ८४ ॥ अद्यापितत्प्रकरणंप्रथितंपृथिव्यांतत्संज्ञयालघुमहार्थमनल्पनीति ॥ शिष्टैर्गृहीतम
तिशिष्टपदानुविद्धंवेदांतवेद्यपरतत्त्वनिवेदनंयत् ॥ ८५ ॥ तोटकाह्वयमवाप्यमहर्षेःख्यातिमापसदिशासुत
दादि ॥ पद्मपादसदृशप्रतिभावान्मुख्यशिष्यपदवीमपिलेभे ॥ ८६ ॥ पुमर्थाश्चत्वारःकिमुतनिगमाऋक्प्रभृ
तयःप्रभेदावामुक्तेर्विमलतरसालोक्यमुखराः ॥ सुखान्याहोधातुश्चिरमितिविमृश्याथविबुधाविदुःशिष्या
न्हस्तामलकमुखरान्शंकरगुरोः ॥ ८७ ॥

बुधकृतविमर्शंदर्शयति धर्मार्थकाममोक्षाख्याश्चत्वारः किमुतऋग्यजुःसामाथर्वणाख्यावेदाः किंवासालोक्यप्रमुखाःसालोक्यसामीप्यसारू
प्यसायुज्याख्यामुक्तेर्भेदाःआहोस्विद्ब्रह्मणोमुखानीति विबुधादेवाःपंडितावा च्चिरंविमृश्यविचार्य हस्तामलकादीन्शंकरगुरोःशिष्यान्विदुः
॥ शि० ॥ ८७ ॥

स्फारद्वाराणांविस्तीर्णद्वाराणांप्रघाणेषुबाह्यप्रकोष्ठेषु द्विरदानामैरावतप्रभृतीनांगजानांमदस्यसमुल्लोलेषु अतिचंचलेषु कल्लोलेषु याभृंग्यस्तासां संगीतस्योल्लासभंग्यामुखरितामुखरीकृताध्वनिताहरितोदिशोयासुताः स्वर्गसंपदः अधिगतायाभगवत्पादसिद्धांतकाष्ठातस्यांनिष्ठायाःसंपद उल्लसन्निरवधिकसुखदस्य स्वात्मनोलाभस्यैकोगुल्योलाभोयेषांतैरर्किंपचानैरल्पुदारैर्निष्ठूयंते थूत्क्रियते ॥ स्व० ॥ ८८ ॥ मंथाचलेन मथि तात्सिंधोर्भवंत्याःसुधायाःफेनस्याभावदाभायस्यामृतकांतिनिभेनतत्तुल्येनस्वयशसा देदीप्यमानःस्वदृष्ट्याऽपरंनिकृष्टंपरमन्यंवाऽसतांनिरुं

स्फारद्वारप्रघाणद्विरदमदसमुल्लोलकल्लोलभृंगीसंगीतोल्लासभंगीमुखरितहरितःसंपदोऽकिंपचानैः॥ निष्ठ्यं
तेतिदूरादधिगतभगवत्पादसिद्धांतकाष्ठानिष्ठासंपद्विजृंभन्निरवधिसुखदस्वात्मलाभैकलोभैः॥८८॥ सन्निं
धानोमंथाचलमथितसिंधूदरभवत्सुधाफेनाभेनामृतरुचिनिभेनात्मयशसा॥ निरुंधानोदृष्ट्यापरमहहपंथा
नमसतांपराधृष्यैःशिष्यैररमतविशिष्यैषमुनिराट्॥८९॥ इतिश्रीमाधवीयेतद्वत्तधाव्यादिसंश्रयः॥ संक्षे
पशंकरजयेसर्गोयंद्वादशोऽभवत्॥१२॥ मू॰सं॰११२ ॥छ॥ ॥छ॥ ॥छ॥

धानः पैररधृष्यैःशिष्यैःसहमुनिराट्श्रीशंकरोविशेषेणारमत ॥ शि० ॥८९॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपाद शिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिकृतेश्रीशंकराचार्यविजयडिंडिमेद्वादशःसर्गःसमाप्तिमबीभजत् ॥ ॥ श्रीशंकराचार्यायभगव[ते] नमः ॥ टी०सं ॥ २४० ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

इति श्रीशंकरदिग्विजये द्वादशःसर्गःसमाप्तः